कामेश्वर पञ्चांग

प. ६४

नं. ४६६

नं. ४६६

कामेश्वरीपंचांग

नं. १५१५

12



[illegible]

5947

32

54

कां॰
मे॰
प॰
१

ॐश्रीगुरवेशिवायनमः ॐश्री
कामेश्वरभैरवायनमः श्रीदे
व्युवाच ॐपञ्चाङ्गंदेवदेवस्य
श्रोतुमिच्छाम्यहंप्रभो कामेश्व
रस्यदेवस्यवक्तुमर्हसिसाम्प्रत
म् १ श्रीभैरवउवाच परमेश्वर
स्यदेवस्यमहाकामेश्वरस्यते
भक्त्यावक्ष्यामिपंचांगंनाख्येयं
यस्यकस्यचित् २ पटलंपद्धतिं
वर्मंमंत्रनामसहस्रकम् स्तो
त्रंमंत्राङ्गभूतंचगोपयेद्यःससा
धकः ३ तत्रादौपटलंवक्ष्येदी

ज्ञानायकवल्लभम् गोप्यंपरम
गुह्यंचगोप्तव्यंवमुमुक्षुभिः ४
मंत्रोद्धारंप्रवक्ष्यामिकामेश्वरस्य
तेप्रिये ५ वाक्भवंकामराजं
चशक्तिस्तारंतथैववच लक्ष्मीलि
ज्ञामहेशानिकूटत्रितयमेव
च कांतिःश्रंरंनिजराणंडलिमो
हकवशपकौ मंत्रानेकेशाबीजं
स्यादादिकूटोयमीरितः शक्तिः
कांतिःस्वरोमेक्रोधांतजीमूतव
ञ्जयः वाग्भकेशोद्वितीयंस्यात्
कूटराजोनवाक्षरः वाग्भवंक्लिं

का॰ त्मोपंतुदेवमेकार्णीवायवः
प॰ सकचानित्यदेवस्यकूटोयंस्या
२ त्तृतीयकः तारंलज्जाचलक्ष्मी
श्चप्रणवंशक्तिरेवच कामराजं
चवाणींचपश्चात्नामसमर्पये
त् स्वमंत्रेचततोदद्यान्मंत्रोय
मीरितःप्रिये वक्ष्येविंशाक्षरावि
द्यात्रिहृत्काकामदेवना कामेश्व
रस्यदेवस्यगोपनीयंप्रयत्नतः
राज्येदेयंशिरोदेयंदेयासस्यात्म
दाक्षिने वसुपूर्णगृहंदेयंनदे
यमंत्रराजकम् गोप्यंगोप्यतमं

गुह्यंगुह्यंमंत्रंचशंकरजन्मनः गुह्या

निगुह्यंगोप्यंमंत्रंमंत्रंसाधकायैनगो

पयेत् यस्यश्रीमंत्रराजस्यदो

षोनैवचविद्यते मंत्रोत्कीलन

दोषोमंत्रसंजीवनस्यच सम्पु

टस्यविनादेविपुरश्चरणकर्म

णा गुरुहस्तेनवादेविसाधक

स्यकरेणवा पुरश्चर्याप्रजपेत्वी

नवर्णलक्षंजपावधिम् नक

दाचिन्नजपेद्वीनस्वहस्तेनचसाध

कः नजिष्यन्निनवनहस्तेनागन्या

सस्यमंत्रिणाम् नवारदोषोनो

का॰
प॰
३

3

विघ्नोनाशौचंनियमोनच साक्षा
दमृतरूपोयंमंत्रः कामेश्वरस्य
च यंत्रोद्धारंतथाध्यानंप्रयोगा
नष्टवक्ष्यहम् ऋष्यादिकंप्रव
क्ष्यामिशृणुत्वंवीरवंदिते ऋषिः
स्यादृक्षिणामूर्तिः पंक्तिश्छंदउ
दाहृतम् देवताचमयाप्रोक्ता
महाकामेश्वरस्तथा लक्ष्मीबी
जंपराशक्तिःकामराजस्तुकी
लकम् चतुर्वर्गेषुविद्यायांवि
नियोगःप्रकीर्तितः यंत्रोद्धारंप्र
वक्ष्यामिसर्वाशापरिहारकम्

सर्वसम्मोहनं यंत्रं सर्वसिद्धिप्र
दायकम् अथ यंत्रोद्धारः विंदु
त्रिकोणवसुकोणदशारयुग्मे
मन्वश्रनागदलसंगतषोडशा
रम् वृत्तत्रयं च धरणीसदनत्र
यं च श्रीचक्रराजमुदितं परमे
श्वरस्य इति यंत्रोद्धारः अथ ध्या
नं प्रवक्ष्यामि सर्वतंत्रेषु गोपि
तम् सा देवी कामेश्वरस्यैव सर्वसं
ममपार्वति येन ध्यानेन ब्रह्मा
ण्डं कटाहांतं विलीयते उद्यन्मा
र्तण्डकोटिद्युतिममृतकला

का॰
पं॰
४

शोवरेंशपामकण्ठं मुक्ताभस्मा
ह्रिरत्नैर्विलसितवपुषं त्रीक्ष
णंचापबाणान् बिभ्राणंपाश
मुष्टैःसृणिमपिचकरैःसेविते
देवदेव्यावामांकेनौमिकामेश्व
रममरपतिंविश्वमूर्तिममूर्ति
म् इतिध्यानम् अनेनध्यानमा
र्गेणब्रह्माविष्णुहरःशिवे ब्र
ह्मादयःसुरगणाजातानिस्व
न्दवत्सुषः कथयाम्यद्यदेवेशि
लम्भनादिविधिंपरम् येविधा
यमहेशानिसाधकोयोगवा

भवेत् स्तम्भने मोहने चैवमा
रणाकर्षणे तथा सांतानिकं
मौक्तिकं च प्रयोगादशकीर्ति
ताः स्तंभने रविवारे तु स्नात्वा
जप्त्वा मंत्रं शिवे यमुद्धार्यं भवेत्
तूर्णं स्तंभने त्वरितं कलौ ता
रे रमां परं तारं कूटत्रयमुदी
रयेत् तारं परं रमां तारं फट्
स्तंभने करोत्ययम् गतेः सूर्य
सवेद्दस्य जलवानादियाप्यसा
म् रिपौ मौन्यादि दस्तनां स्तम्भ
नं जायते ध्रुवम् इति स्तंभनम्

का. रवौस्नात्वानदीतीरेजपेल्लंम
प. हेश्वरि यस्योच्चारणमात्रेणमो
५ हमेष्यतिभैरवः तारंकामःश्र
5 ज्मारंकूटत्रयमन्तःपरम् शार
ण्कामंभुवनस्मारंफट् मोहनमन्त्रः
स्तः देवानांचनरेशानांस्त्री
णामप्सरसांतथा सद्योदर्शन
मात्रेणमोहनंजायतेध्रुवम्
इतिमोहनं रवौश्मशानेमंत्र
मजपंकृत्वामहेश्वरि आनीय
भस्ममुष्टिंवाक्षिपेत्शत्रुगृहे
पथि सप्ताहान्म्रियतेशत्रुःसा

यकस्यनसंज्ञायः तारंकाली
वकूर्चंचत्रिकूटपदमुच्चरेत्
कूर्चंकालींतथातारंफट्मार
णमनुःस्मृतः रूपोवारूपभ
स्मोवाविप्रोवाक्षत्रियोपिवा श
त्रुःकालसमानोपिम्रियतेमेघ्य
निभैरवि इतिमारणम् खोमं
त्रंजपेन्मन्त्रीनःकामीसाधकस
त्तमः रंभाद्यप्सरसांदेविभवे
दाकर्षणंततः तारंमारंवाग्भ
वंचकूटत्रयमुदीरयेत् चन्द्र
मारंतथातारंफडाकर्षिमनुः

का
प॰
९
6

स्मरनः अस्योच्चारणमात्रेणसकृ
दाकर्षणंभवेत् रंभास्वर्गस्थि
तावापितत्रातःप्रादुर्भविष्यति
इत्याकर्षणम् रवौमध्याह्नसम
येस्नात्वामूलंजपेत् शिवेजप्त्वा
शीघ्रंवशंयातित्रैलोक्यंसचरा
चरम् तारंपरंस्मरतारंकूटत्रयं
महेश्वरि तारंस्मरःपरंतारंफ
ह्रवशीकारकोमनुः अस्योच्चा
रमात्रेणैवाअपिमहेश्वरि स
यःकिंकरतांयातिकिंपुनःक्षु
द्रभूमिपाः इतिवशीकरणम्

स्वौं गत्वा श्मशाने च जपेन्मूलं
महेश्वरि यज्ज्ञपेन भवेन्न शत्रो
रुच्चाटनमरिन्दमम् तारं ह्रं
जं शारं च कामः कूटं त्रितयं चक्र
रेन् कामः शक्तिः स्नने तारं फट्
च्चाटनको मन्त्रः दशवारं प्रज
पेन मंत्रेण परमेश्वरि रिपुमु
च्चाटये हे विशालाक्षि मम पिप्र
ये इत्युच्चाटनम् स्वौं जपेन्मंत्रं
देवि दशवारं यथाविधि त्रिवा
रं सर्वरोगाणां मध्यः शांतिर्भवि
ष्यति तारं शारं तथा कामः कूट

का॰
पु॰
८

त्रयं समुच्चरेत् कामः स्पर्शाद्या
नारं फट् शांतिककरो ऽस्य यम्
रोगानामतिहृष्टीनां ग्रहाणां स्व
रवं दिते उपद्रवस्य सर्वस्य सद्यः
शांतिर्भविष्यति इति शांतिकम्
रवौ स्नात्वा जपेन्मूलं दशवारं
महेश्वरि पिपासाकितदिग्भा
वे महाग्राहैः प्रजायते नारंमा
रेस्मरस्तारं हृट् त्रयं महेश्वरि
नारं स्मरो मारं नारो फट् पौष्टि
ककरो ऽस्य यम् दुर्बलानां नरा
णां च पितॄणां च दिवौकसाम्

सकृदुच्चारमात्रेण महापुष्टिः
प्रजायते इति पौष्टिकम् रवौ
जपेन्मन्त्रं देवि साधको देवता
गृहे येन जप्तेन वध्यायां भवेत्सु
तोन्वयेश्वरः तारंशान्तशारन्तारं
कूटत्रितयमुच्चरेत् तारंशारन्त
शान्तारं फट् च सौमानिको मनुः
वंध्यायाः काकवंध्यायाः स्तनप
याः महेश्वरि पुत्रा भवन्ति भूमी
शाः सकलैकप्रदायकाः इति
सौमानिकम् रवौ शान्त जपेन्मू
लेन मन्त्ररूपं महेश्वरि यस्सोच्चा

का॰ रणमात्रेणमौक्तिकंजायतेध्रुव
पृ॰ म् नारंरमारमानारंफट्त्रयमु
८ दीरयेत् नारंरमारमारंनारंफट्
मौक्तिककरोत्स्पयम् इतिमौक्ति
कम् ददंहिममसर्वेश्वरहस्यत्रि
दिवौकसाम् गोप्यंगुह्यतमंदेहि
नप्रकाश्यंकदाचन इतिदशप्र
योगाः अधुनादेविवक्ष्यामिपूजा
पटलमीश्वरि देवस्यपरमेष्ठा
स्यपूजांमानसिकींचरेत् स्थ
केस्ऌनकेवापिपथिकांतारमं
डले म्लेछभूमौचकारायांसंक

टेरणमण्डले मनसैवचरेत्सूजां
त्रिकूटस्यमहेस्वरि श्रृणुत्वंभक्ति
भावेनयथावद्दर्पितेमया अस्या
यशायनाहेविद्यालेदिव्यमुहूर्ते
के प्रत्तात्पमुखेहूलोंद्रीनाथस्य
त्रिमहेस्वरि प्राणायामत्रयेकृ
त्वागुरुंध्यात्वामशक्तिकम् देवं
कामेस्वरंचैवपरमेशंसनातन
म् ध्यात्वापूर्वेणषंटीचैन्योसंकृ
त्वायथाविधि जपेन्मूलंचगाय
त्रींगुरवेतत्समर्पयेत् आगत्य
बहिरोंकारंजपन्नारणभूमिष्ठ

का॰
प॰
९

9

नत्रमूलादिसंन्यस्यवर्णोक्तंशौ
चमाचरेत् कामबीजेनसंशोध्य
देतान्साधकसत्तमः मायाबीजे
नगएइषंत्रयंकुर्यान्महेश्वरि मू
लेनदेवितीर्थानितदावाह्यवसि
इये ॐगंगेचयमुनेचैवगोदाव
रिसरस्वति नर्मदेसिंधोकावेरि
जलेस्मिन्सन्निधिंकुरु इत्यावा
ह्यमहादेविदेवमावाहयेत्ततः
मूलेनत्रिःसमुत्क्षेप्यनद्यंभसिम
हेश्वरि ततोमूलंजपेन्मंत्रीगाय
त्रीचविशेषतः सूर्यायार्घ्यत्रयं

दयाद्देवदेवोत्तरथैवच प्रथ
मेकूटमघोर्यपरमेश्वरायवि
महे द्वितीयकूटंततोदयाका
मेश्वरायधीमहि तृतीयकूटंवो
श्चार्यतन्नःकामेश्वरःप्रचोदया
त् जलादारुह्य वासांसिपरिधा
यवसाधकः संध्यामनसा
कृत्वाचाचमर्षणपूर्वकम् सं
ध्यानिवर्त्यदेवेशियागगेहं त
तोव्रजेत् ततोद्वाराचर्चनंकृत्वा
कुर्यादासनशोधनम् भूतशु
द्धिंततःकृत्वाप्राणायामविधिं

का· प· १· 10

ततः न्यासभागेन देहं च देवि शि
वमयं चरेत् मनसा वर्णभावो
त्थश्रीचक्रं तत्र भावयेत् विभा
व्य तत्र श्रीचक्रं हृदये साधको
त्तमः योगपीठं ततो भ्यर्च्य शि
वस्य परमात्मनः बिन्दौ कामे
श्वरं देवं परमेशं सनातनम् पा
त्राणि स्थापयेत् तत्र त्रिकोणे ज
लनिर्मिते चतुरस्रं मण्डलं च
विधाय गंधतोयोभिः सामान्या
र्घं च देवस्य मण्डलं पूजयेत् शि
वे चतुरस्रे मंडले च समभ्यर्च्य

वरेन्ननः ॐ ग्लाय फडित्येवं मं
स्त्राण्यात्रत्रिपादिकाम् तत्रास्त्र
क्षालितं शंखं समभ्यर्च्य तथास्त्र
थीः तत्रार्कमंडलं देवि सोमव
ह्नेश्च मंडलम् संपूज्य मूलमं
त्रेण कलास्तेषां समर्चयेत् मू
लाष्टमंत्रितं देवि विधायतीर्थ
वारिच तेनापूर्य शिवे शंखं शंख
मुद्रां निवेद्य च तीर्थमावाह्य देवे
शि देवं तत्रैव भावयेत् सामान्य
र्घ्यस्य वामे तु शोभिते कलशं शि
वे अप्सैचैव यडंगं च हं तं यास्त्र

का॰
प॰
११

मंडलम् सुधाब्धिनैः समभ्यर्च्य
तत्त्रकूटत्रयेणच षडंगान्यास
भागेनसमभ्यर्च्यषडस्त्रकम्
चतुरस्त्रेणतथाभ्यर्च्यसंस्थाप्या
त्रत्रिपादिकाम् कलाःसूर्येंदुव
ह्नीनांसमभ्यर्च्ययथाविधि कल
शेस्मिन्महादेविदेवंसंपूजयेत्
शिवम् आनन्दभैरवंचैवदेवि
कूटत्रयेणच मायारमाकाम
वीजैर्धेनुमुद्रांप्रदर्शयेत् मत्स्य
मुद्रादिनाच्छाद्यसामान्यार्घ्यस्य
दक्षिणे कलशस्थापनेऽकार्यां

सामान्यार्घ्यं महेश्वरि शांतिपा
त्रं समादाय मूलेनाभिमंत्रि
तम् तत्रैव शोधनी पात्रं तथा
वर्धकपात्रकम् गुरुपात्रादिषु
स्थाप्यतीर्थे शंखादयोप्यथः पं
क्त्याकारेण देवेशि पात्राणि स्था
पयेत्ततः न्यासं षडंगपूर्वकम्

पाद्यार्घमधुपर्कचा
चमनीयपात्रस्नानं
विधाय देवदेवस्य

मणिपूरे ब्रह्मरंध्रे मूलाधारादि
के शिवे शिवस्य सामरस्यं च वि
भाव्य साधकेश्वरः ततः काम
कलारूपईश्वरीकृतविग्रहः
शिवस्य षोडकांचनर्पयामि

का॰ नमश्च्नि समयादेविसंतर्प्पित
प॰ नःकूटत्रयेणच सर्वत्तनाल्य
१२ नशाक्ताया: पूजनीयश्चतर्पणः
प्राणायामत्रयंकृत्वामूलदेवं
चतर्पयेत् परिवारानततोभ्य
र्च्यआज्ञामादौवप्रार्थयेत् ॐ
कामेश्वरमहादेवभक्तानुग्रह
कारक प्रनुज्ञांदेहिमेशीघ्रंप
रिवारार्चनायमे विदोकामेश्व
रंदेवंपरिवारानततोर्चयेत्
विधिंवक्ष्यामिनेदेविसमाहत्या
वसंश्रृताम् चतरस्त्रत्रयेसम्य

कादिर्यौवादीन् च पूजयेत् पु
ष्पैश्च तर्पयेद्गन्धादि विशेषार्घ्य
स्य बिंदुभिः इन्द्रादील्लोकपाला
श्च सायुधांदीश्च तर्पयेत् ततो
मूलेन देवेशं संतर्प्यैव यथाक्र
मम् प्रथमावरणं स्थेन त्रैलो
क्यमोहनाभियम् द्वितीयाव
रणं वह्नेः सर्वाशापूरकाभिय
म् बीजत्रयं च देवेशि बालाया
श्च मनोहरम् स्वरैः षोडशभिः स
ह्कं कामाकर्षणकं ततः एवं
बुद्ध्याकर्षणं चाहंकाराकर्षणं

का॰
प॰
१२

13

तथा संतर्पयेत्गुरूंस्तत्रदि
व्यौघादीन्महेश्वरि परशक्ति
युताः सम्यक्तीर्थैः स्वानामहे
श्वरि तत्त्वत्रयेणवाचम्यशिव
एवभवेत्स्वयम् श्रीचक्रेचैव
देवस्यरूपंध्यात्वात्रिवर्णकम्
स्थापनेसन्निधानचेसंमुखीक
रणेशिवे मुद्राभिःसाधकःकृ
त्वादेवीसम्यक्षादिमुद्रया देवाय
मूलेनैवचत्राणान्दत्त्वामहेश्व
रि शिवशक्त्योःपरंरूपंध्यात्वा
पूजांसमाचरेत् ततोसौदेवस्य

शिवेपाद्यार्घ्यादीन्निवेदयेत्
मधुपर्कंनिवेद्याथनिवेद्याच
मनीयकम् नानालंकारवस्त्रा
णिनिवेद्यसायकोन्नमः नैवे
द्याचमनीयादिशिवस्यचनिवे
दयेत् धूपदीपादिसंभाव्यप
रमान्ननिवेद्यच तांबूलंचमु
खवेदन्याहृत्शास्त्रार्याद्यात्तनप
येत् पुष्पांजलिंचश्रीचक्रेद
त्त्वापूजांसमाचरेत् शाहाकर्ष
णंकंचैवस्पर्शाकर्षणंकेतथा
रूपाकर्षणंरसाकर्षणंचत

का. ये वहि गंथाकर्षणकं चित्ताक
प. र्षणं सर्वसिद्धिदम् येयाकर्षण
१४ कं सत्याकर्षणं स्वरवंदिने ना
माकर्षणकं बीजावार्षणं वीर
वंदिने आत्माकर्षणकं वै वा
रिताकर्षणकं तथा शरीराक
र्षणं देवि सेतत्पंचयथाक्रमम्
प्रतमूलेन देवेशं सम्पूज्य च वि
धानतः वाग्भवं बीजमुच्चार्य
योनिमुद्रां प्रदर्शयेत् प्रणमे
त्वततो भक्त्या देवं कामेश्वरं
प्रिये सर्वाशापूरकं चक्रं कथि

14

नेभक्तवत्सले सर्वसंक्षोभकं
चक्रंवक्ष्यामिवक्रनायिके ख्रा
दौबीजत्रयंदद्यात्कवर्गंचत
तोवदेत् असितांगंभैरवंचस
मुद्धृत्यचयथाक्रमम् एवंचवर्गं
देवेशिरुरुभैरवमीश्वरि टव
र्गंपरमेशानिचंडभैरवमर्चये
त्वर्गंततोदेविक्रोधभैरवमुत्त
मम् पवर्गंविश्वजननिभैरवो
न्मत्तसंज्ञकम् यवर्गंदेवदेवेशि
कपालेश्वरभैरवम् शवर्गंच
ततोदद्यात्भीषणाख्यंचभैरव

का म् लंह्नः बीजहृदये देवि संहारंभै
प. रवं तथा एतेष्टौ भैरवा देवि अ
१५ ष्टपत्रेषु पूजयेत् तर्पयेच्च त
15 तो भक्त्या योनिमुद्रां प्रदर्शयेत्
एतत्चक्रत्रये देवि चंद्ररूपं वि
चिंतयेत् पुष्पैस्तु पूजयेद्भक्त्या
प्रणमेत्तत्र मुद्रुर्मुद्रः सर्वसौभा
ग्यदे चक्रे वसामि प्राणवल्लभे
ऐं क्लीं सौः द्रां सर्वसंक्षोभणे देवं
द्रीं सर्वविद्रावणे तथा ईं सर्वा
कर्षणे देवं ईं सर्वाह्लादने ततः
उं सर्वसम्मोहने देवं ॐ सर्वस्त

म्भनकारकम् क्रेंसर्वजृंभणं
चैव ऋंसर्वविवशंकरम् ल्रंसर्व
रञ्जने देवं ल्रंसर्वोन्मादने तथा
ऐंसर्वार्थसाधने देवं ऐंसर्वस
म्पत्प्रपूरणम् ओंसर्वमंत्रमये
देवं औंसर्वद्वंद्वक्षयकरम् चतु
र्दशारे चक्रेतु पूजयेच्च यथाक्र
मम् मूलेन मूलदेवं तु योनि
मुद्रां प्रदर्शयेत् सर्वसौभाग्यदं
चक्रं कथितं तव सुव्रते सर्वा
र्थसाधकं चक्रं वक्ष्यामि शृणु
त्रिने पुष्पैश्च पूजयेज्जपामूले

का॰ प॰ ९

16

नैवमहेश्वरि सर्वसिद्धिप्रदं स
र्वसम्पत्प्रकरणम् सर्वप्रियंक
रं देवं सर्वमंगलकारकम् स
र्वकामप्रदं चैव सर्वदुःखविमो
चनम् सर्वशत्रुप्रशामनं सर्व
विघ्ननिवारणम् सर्वांगसुंदरं
देवं सर्वसौभाग्यदायकम् ब
हिर्दशारचक्रे तु सम्पूज्य चय
थाक्रमम् मूलेन मूलदेवं तु
योनिमुद्रां प्रदर्शयेत् सर्वरक्षा
करं चक्रं शृणु मन्त्राणवल्लभे
सर्वज्ञदेवं देवेशि सर्वशक्तिम

येनतः सर्वैश्वर्यप्रदं देवं स
र्वज्ञानमयं तथा सर्वव्यापित्व
शमनं सर्वाधारस्वरूपकम्
सर्वपापहरं देवं सर्वानन्दम
येनतः सर्वरत्नस्वरूपं च स
र्वेप्सितफलप्रदम् बहिर्देशा
रचक्रेतत्पूजनीयाय यथाक्रमम्
मूलेन मूलदेवं त्र्योनिमुद्रां प्र
दर्शयेत् एतत्चक्रे त्रये देवि
सूर्यरूपं विचिंतयेत् षष्ठावर
णं केलेतनत् प्रणमेत् चैव भक्ति
नः सर्वरोगहरं चक्रं वक्ष्यामि

का० पु० ९

17

नवसुंदरि वशीकरणदेवंच
कामेश्वरंतथैवच मोदनवि
मलौचैव [illegible] सर्वे
श्वरंमेततः परम् कौलिनंभैर
वंचैवपूजयेत्तर्पयेत्ततः ग
न्धाक्षतप्रसूनाद्यैर्मूलदेवंच
तर्पयेत् समाप्तिक्रमवामेन
प्रणमेद्योनिमुद्रया वाग्देव
ताष्टकंपूर्वंरक्तपुष्पैर्विशेष
तः अंतरालस्यचक्रायदत्वापुष्पां
जलिंततः दत्वायोहस्तकम
लेदेव्याःपश्चिमभागके वरं

वामपदेवंचत्रिशूलंखंगमे
वच चतुर्भुकरपद्मेषुपूजये
दायुथानितु सर्वसिद्धिप्रदा
याश्रीचक्रायमहेश्वरि द
क्षाणुष्पांजलिंपूजामारभेत्स्वा
यकोत्तमः आत्मेश्वरंचपर
मात्मेश्वरंनंदंतरम् अंतरा
त्मेश्वरंचैवपूजयेत्साधकोत्त
मः कूटत्रयेणदेवेशित्रिको
णेसाधकोत्तमः इतिसंपूज्य
सेनष्यं मूलेनमूलदेवनाम्
सर्वानन्दमयायाश्रीचक्रा

का॰ यस्तु बिंदवे दद्यात्तु छागं जलिं
प॰ देवि साधकः सर्वसिद्धये मू
१८ लविद्यां समुच्चार्य सप्तवारं म
18 हेश्वरि पूजयेत्साधको भक्त्या
महाकामेश्वरं ततः इति सं
पूज्य संतर्प्य गंधाक्षतप्रसून
कैः धूपदीपादिभिश्चैव नैवेद्यै
श्च महत्तरैः तथाश्रीवटुका
यापि दद्याद्बलिमुत्तमम् द
त्वा देवाय च पुनर्नैवेद्याचम
नीयकम् तांबूलं छत्रचामरा
रात्रिकादीन्निवेदयेत् मुद्राः

प्रदर्शयेद्देवि सायकः परमे
श्वरि देवाग्रे च जपं कृत्वा पाठं
कुर्यात्ततः परम् वर्मसहस्र
नाम्नो स्तोत्रराजस्य पार्वति
शिवशक्तो महादेवि जपं तत्र
समर्पयेत् गुह्याति गुह्य गो
प्ता त्वं गृहाणास्मत्कृतं जपम्
सिद्धिर्भवतु मे देव त्वत्प्रसादा
न्महेश्वर प्रातः प्रभृति सायं
तं सायादि प्रातरन्ततः यत्क
रोमि जगद्देव तदस्तु तव पूज
नम् संहारमुद्रया देवि देवदे

का॰ क्षौविसृज्य च स्वयं सदाशिवो
प॰ भूत्वा शिवशक्तिस्वरूपकः
१९ त्रैलोक्यं साधको देवि सुखं च
19 विहरेदिति प्रयोगांश्चैव वक्ष्ये
हं महौ पर्वतनन्दिनि उपचा
रं बवीम्यथनौ द्वेषं डुरात्मने
स्तम्भनं मोहनं चैव मारणाक
र्षणे तथा वशीकारं तथोच्चा
टं शान्तिकं पौष्टिकं तथा एते
षां स्थापनं वक्ष्ये जगतां हितका
म्यया अभक्ताय न दातव्यं न दु
ष्टाय कदाचन स्वाङ्गम्यायशा

यनात्तगत्वाश्चेतगृहांतिकम्

मूलेमायकपृवाश्चजपेदयुत

संख्यया होमोजातीफलैःपीतैः

पुष्पैश्चहतमिश्रितैः शत्रुसैन्या

दिदस्तंतोवादिनोस्तंभनंभवेत्

इतिस्तंभनम् सोमेमध्याह्नस

मयेस्नात्वाकूपजलेनत कू

पांतिकेमंत्रंजप्त्वामायकोयुत

संख्यया होमयेत्तहतमिश्रंच

माहिषंदधिशर्करम् भस्मना

तिलकंकुर्यान्मोहयेद्भुवनत्र

यम् इतिमोहनम् भोमेयंत्र

का॰ प॰ २॰

त्रसमयेचतच्छथगतःसुधीः
अयुजंतजपेन्मूलंहोमयेद्भूत
पायसम् रक्तचंदनमिश्रंच
स्त्रीकेशैश्चसमन्वितम् शत्रुः
कालसमानोपिम्रतुमेच्छति
नान्यथा इतिमारणम् बुधेनि
शावसानेतगत्वाशून्यालयंज
पेत् अयुतंमूलमंत्रंतहोमये
तद्भूतशर्कराम् कर्णिकारस
हस्रंतबिल्वपुष्पाणिपार्वति
रंभायप्सरसांचापिभवेदाकर्ष
णंध्रुवम् इत्याकर्षणम् गुरौ

सूर्योदये गत्वा नदीतीरं च सा
यकः मूलमंत्रं च देवस्य जपे
दयुतसंख्यया होमः सर्पिर्दधि
क्षीरमक्षिकामालती प्रसूनैः श्री
फलैः सह मा देवि वशायेद्भुवन
त्रयम् इति वशीकरणम् ॥ शु
क्रे निशामुखे गत्वा वटमूले ज
पेन्मन्त्रम् अयुतं साधको भक्त्या
होमः कार्यस्तु सर्पिषा दध्याद्रा
क्षाविमिश्रेण गोमूत्रेण च पाय
सैः शत्रोर्मन्त्रसहस्रस्यापि भव
त्युच्चाटनं ध्रुवम् इत्युच्चाटनम्

का. प. २१ 21

षानौप्रभातसमयेकृत्वाक
मीक्लिकेसुधीः आगत्यार्चनश
यांतुजपेन्मंत्रायुतंशिवे हो
मयेत्सर्पिरम्भोजसहस्राणि
वन्हईश ग्रहाणांदेवकोपानां
यक्षाणांरक्षसांतथा उपद्र
वाणांसर्वेषांभयानांन्टपते
स्तथा क्रूराणामतिवृष्टीनां
महाशांतिःप्रजायते इतिशां
तिकम् सर्ववारेषुसर्वत्रजपे
न्मंत्रंसदायुतम् होमयेत्सर्पि
रत्नोटमिश्रंचंदनमिश्रितम्

पायसेनकृमिश्चचमीनमांसम

मन्वितम् देवतानांमनुष्याणां

रोगार्तीनांमहेश्वरि बलादीनां

न्रुपादीनांमहावृद्धिःप्रजायते

इतिपौष्टिकम् इतीदंपटलंगो

प्यंगुप्यमांगमहेश्वरि मारंचप

रमेशास्यरहस्यंणीयंस्वपुत्रवत्

गुप्तंगुह्यतमंगोप्यंगोपनीयं

स्वयोनिवत् इतिश्रीरुद्रयाम

लेतंत्रेदेवीभैरवसंवादेश्रीका

मेश्वरपटलःसमाप्तः ॥

22

22

ॐ श्रीगुरवे शिवाय नमः ॐ श्रीका
मेश्वरभैरवाय नमः ॐ श्रीगणेशा
य नमः प्रवक्ष्यामि तव श्रीमत्सर्व
तंत्रेषु गोपितं गद्यपद्यमयीं दि।
व्यां ज्ञातः कृत्वादिविग्रहां गोप्यां
त्वेकोनपंचाशद्वर्णबीजमयीं शु।
ए श्रीमत्कामेश्वरस्यास्य भोगानि
र्वाणसिद्धिदां तत्र श्रीमान्साधको
ब्रह्ममुहूर्ते उत्थाय आवश्यकं कृ
त्वा अघ्न्यपादादि प्रक्षाल्याकरचर
णौ प्रक्षाल्याचम्य यौनवासमीपवि
याय भूमावासने समासीनो यं तत्रो

पविश्य स्वशरसि सहस्रारकम
लकेसरकर्णिकांतर्गतं निजगुरुं
शुक्लालंकारं स्वशक्त्या सहितं ध्या
त्वा मानसोपचारैराराध्य संपूज्य
प्रणमेत् प्रातः शिरसि शुक्लाब्जे
द्विनेत्रं द्विभुजं गुरुं वराभयकरं शा
न्तं स्मरेत्तन्नामपूर्वकं पूर्वोक्तध्याने
वितं कामेश्वरीसहितं देवं ध्यात्वा
किंचिन्मात्रं मूलं जप्त्वा जपं गुरवे स
मर्प्य अथ सूर्योदयमारभ्य सूर्योदय
पर्यंतं अजपाजपं षट्शताधिकमे
कविंशतिसहस्रसंख्याकं श्वासात्तु

का॰ प॰ १

स्तोत्रेणजपित्वा इतिजपं गुरवेस
मर्प्य देववस्त्रेणास्य तदाज्ञां गृही
त्वा प्रातःप्रभृतिसायांतंसायादि
प्रातंततः यत्करोमिजगन्नाथत
दस्तुतवपूजनं इतिप्रार्थ्य वर्णाश्र
मोचितंशौचंविधाय क्लींकामदे
वायसर्वजनमनोहरायनमः इ
तिदंतान्विशोध्य मूलमंत्रेणहस्त
पादमुखप्रक्षालनंकृत्वा स्नानसा
मग्रींगृहीत्वा नद्यादौगत्वा फडस्त्र
स्त्रायफट् इतिमंत्रेणतीरंप्रक्षाल्य
तत्रसामग्रींकेथात्वा जलेप्रथम

तोमलयोत स्नानंकृत्वा स्वपुरतो
हस्तमात्रंचतुरस्रं विविंत्य गांगे
गेति तीर्थमावाह्य जलेश्रीचक्रं
विभाव्य तत्रकामेश्वरीसहितंश्री
कामेश्वरंमूलेनावाह्य मानसोप
चारैः संपूज्य स्वस्ताग्रवस्त्रखण्डा
दिकंपरिधाय मूलमुच्चरन् जले
त्रिर्निमज्ज्याचमेत् यथामूलमं
त्रमुच्चार्य आत्मतत्त्वंशोधयामि।
स्वाहा विद्यातत्त्वंशोधयामिस्वाहा
शिवतत्त्वंशोधयामिस्वाहा ततो
जलादाकृष्य ह्रींहंसः श्रीसूर्या।

का॰ प॰ ३

३

गणपतेर्घो नमः इत्यर्घत्रयं दत्वा
कामेश्वरीसहितं कामेश्वरं हृदि
विसृज्य वहिरागत्य वामसोपरि
याय उपविश्याचम्य वैदिकीं सं
ध्यां निवर्त्य तांत्रिकीमारभेत् श्वा
दौ प्राणायामत्रयं कृत्वा पूरके १६
कुंभके ६४ रेचके ३२ यथापूर्वो
क्तेनाचम्य चुलकेन जलमादाय
वामहस्तेन तत्सुद्र्या लं वं रं यं हं
इति पंचभूतमंत्रेण सप्तधाभिमंत्र्य
शिरसि शान्तयानेन जलेनाभिषि
च्यावशिष्टमुदकं रडयांतनीत्वा

शरीरकल्मषंप्रक्षाल्यवह्निना।
मावर्त्मनान्तर्जलेन सकल्मषंनिस्सा
र्यं दक्षिणहस्तेनगृहीत्वा स्वमेरु
णावामभागस्थवज्रशिलायामा।
स्फालयेत् ३ इत्यघमर्षणंकृत्वा सू
र्यमण्डले देवंविभाव्यध्यायेत् ध्या
नेस्थैर्यकमेव ऐंहसक्षमलवय
ऊंकामेश्वरायविद्महे क्लींसह
क्षमलवरयूंशक्तीश्वरायधीम
हि सौः यरलवक्षमयूंतन्नःश्रा
त्माप्रचोदयात् ३ इतिगायत्रीस्म
रणीयात्रिसंध्यास्वथनयागायत्रा

का० देवायार्घ्यत्रयं दत्वा ह्रीं हंसः सूर्या
प० यपमतेचैं नमः इति सूर्यायार्घ्य
४ त्रयं दत्वा गायत्रीं यथाशक्ति जप्त्वा
जपं देवाय समर्प्य पित्रादितर्पणं
कृत्वा देवतातर्पणं कुर्यात् इति सं
ध्याविधिः ततस्तर्पणं ऐं ह्रीं श्रीं भै
रवास्तृप्यंतां पवें क्षेत्रपालाः कु
मार्यः योगिनीगणाः सर्वे भूता
श्रीचक्रे त्रिकोणं वामनेत्रे विभाव्य
तत्र मूलेन देवं देवीं विभाव्य ध्यात्वा
मूलेन श्रीत्रिपुरसुंदरीसहितं कामे
श्वरं सांगं सवाहनं सायुधं सपरि

ङ्कंदेतर्पयामि नमः गुरूंस्संतर्प्य
ब्रह्मादिकीटपर्यन्तं संतर्प्य पितृ
तर्पणं कुर्यात् इति तर्पणम् सर्व
वेदेवं संहारमुद्रया स्वहृदि समा
नीय शिवोहमिति भावयन् याग
मंडपं आगच्छेत् ततः पादौ प्रक्षा
ल्य ह्रौं ह्रूं फट् इति द्वारे प्रक्षाल्य
ॐ ऊर्ध्वं गणेशाय नमः वामदक्षि
णक्रमेण ॐ महालक्ष्म्यै नमः ॐ
सरस्वत्यै नमः ॐ गंगायै नमः ॐ
यमुनायै नमः ॐ धात्रे नमः ॐ वि
धात्रे नमः ॐ नंदायै नमः ॐ श्री

का.
प.
५
5

ऐंद्र्यैनमः ॐ प्रचंडायनमः ॐ
क्षेत्रपालायनमः ॐ वेतालाय
नमः ॐ अग्निवेतालायनमः इ
ति संहृत्य यागमंडपात् बहिर्वि
धाय मूलमुच्चार्य आसनशोध
नं कुर्यात् आसनशुद्धिमंत्रो यथा
दि आसनायनमः इत्यासने से
दृस अपसर्पंतु इत्यादिना तत्र
येदत्वा नाराचमुद्रां प्रदर्श्य वि
घ्नोत्सार्य पूर्ववत् प्राणायाम
त्रयं कुर्यात् ततः हंसः इति मंत्रेण
हृदिस्थं जीवात्मानं स्वशिरसि

सदाशिवेनसंयोज्य वामांगेपा
पङ्कजेचक्रसत्ववर्णंब्रह्मादि
पादपङ्कजंरक्तश्मश्रुलोचनं ब्र
ह्मरन्ध्रशिरस्कंचसर्वाणिलयपु
जहये सुरापानलसद्गुरुकेशुक्र
नलकटिद्वयं नसंयोगपदद्वं
द्वंगमग्नसंगमानके उपवान।
करोमाणं रक्तश्मश्रुविलोचनं
खड्गचर्मधरंपापमंगुष्ठपरिमा
णकं अथोमुखेकुलस्ववर्णवाम
ऊर्ध्वाविचिन्तयेत् इतिध्यात्वा पा
पङ्कजंतेहृदिसमानीय शोध

का॰ प॰ ६

णादिकुर्याद्यथा प्राणायामप्रयो
गेन यमिति वायुवीजेन षोडश
धा जपन् वामनासया वायुमापू
र्य पुनः चतुःषष्टिवारं कुंभकेन
जपेत् तद्वत्तत्र वायुनानेन पापपु
रुषं संशोष्य ब्रह्ममात्रेण शुष्कं कृ
त्वा द्वात्रिंशवार दक्षिणनासया
रेचयेत् पुनर्दक्षनासया रमिति अ
ग्निवीजेन षोडशधा जपन् वायुमा।
पूर्य पुनः चतुःषष्टिवारं कुंभके
न रमिति वायुं कुंभयित्वा तद्वद्व
वाग्निनानेन पापपुरुषं भस्मसात्कृ

त्वा पुनस्तद्ब्रह्मद्वात्रिंशद्भिर्वाम
नासयारेचयेत् पुनर्वामनासया
यमितिअमृतबीजेनसहवायुमा
पूर्य वमित्यमृतबीजेषोडशधाज
पन् तद्बीजेचंद्रमंडलेसंचिंत्य वायुं
कुंभयित्वा चतुःषष्टिवारंवमिति ।
जपन् तद्रूपेणामृतेनस्वशरीरसु
षुम्णयापरिप्लुतं विभाव्य पुनःद्वा
त्रिंशद्भिःदक्षिणनासयारेचयेत् त
तःसोहमितिजीवात्मानंस्वहृदये
समानीय प्राणप्रतिष्ठांकुर्याद्यथा
ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः

का॰ प॰ ८

सोहं मम प्राणा इह प्राणाः ॐ आं
ह्रीं क्रौं यं रं लं वं शं षं सं हं हंसः सोहं
मम जीव इह स्थितः ॐ आं ह्रीं क्रौं
यं रं लं वं शं षं सं हं हंसः सोहं मम स
र्वेन्द्रियाणि इह स्थितानि ॐ आं ह्रीं
क्रौं यं रं लं वं शं षं सं हं हंसः सोहं वा
ङ्मनस्त्वक्चक्षुः श्रोत्र जिह्वा घ्राण प्रा
णा इहैवागत्य सुखं चिरं तिष्ठंतु
स्वाहा इति प्राणप्रतिष्ठाक्रमः ॥ इ
ति भूतशुद्ध्यादि प्राणप्रतिष्ठांता
ॐ अस्य श्रीकामेश्वरमंत्रस्य दक्षि
णामूर्तिऋषिः पंक्तिश्छंदः श्रीका

मेश्वरी देवता श्रीं बीजं ह्रीं शक्तिः
क्लीं कीलकं नित्यपूजायां विनि
योगः दक्षिणामूर्ति ऋषये नमः
शिरसि पंक्तिश्छंदसे नमो मुखे
कामेश्वरी देवतायै नमो हृदि श्रीं
बीजाय नमो गुह्ये ह्रीं शक्तये न
मः पादयोः क्लीं कीलकाय नमः
नाभौ नित्यपूजायां विनियोगः।
सर्वांगेषु इति न्यासं कृत्वा मातृ
न्यासं कुर्यात् श्रीकंठन्यासं कुर्या
त् न्यासमन्यत्र लिखितं श्रीकं
ठादिन्यासं कृत्वा कलान्यासं कु।

का.
प.
८

यांगुष्ठाभ्यां ऐं ह्रीं सौं: निवृत्तिकला
त्मने ब्रह्मणे नमः अंगुष्ठाभ्यां नमः
ऐं ह्रीं सौं: प्रतिष्ठाकलात्मने वि
ष्णवे नमः तर्जनीभ्यां स्वाहा ऐं ह्रीं
सौं: विद्याकलात्मने रुद्राय नमः
मध्यमाभ्यां वौषट् ऐं ह्रीं सौं: शा
न्ताकलात्मने ईश्वराय नमः अना
मिकाभ्यां हुं ऐं ह्रीं सौं: शान्त्यती
ताकलात्मने सदाशिवाय नमः
कनिष्ठिकाभ्यां वौषट् ऐं ह्रीं सौं:
ज्योतिष्कलात्मने परब्रह्मणे नमः
करतलकरपृष्ठाभ्यां फट् इति।

करन्यासः अथषडंगन्यासः ऐं
ह्रीँ सौः निवृत्तिकलात्मने ब्रह्म
णे नमः हृदयाय नमः ऐं ह्रीं सौः
प्रतिष्ठाकलात्मने विष्णवे नमः
शिरसे स्वाहा ऐं ह्रीं सौः विद्याक
लात्मने रुद्राय नमः शिखायै वष
ट् ऐं ह्रीं सौः शांताकलात्मने ईश्व
राय नमः कवचाय हुं ऐं ह्रीं सौः
शांत्यतीताकलात्मने सदाशिवा
य नमः नेत्रत्रयाय वौषट् ऐं ह्रीं
सौः ज्योतिःकलात्मने परब्रह्मणे
नमः अस्त्राय फट् इति षडंगन्या

का. प. ५ म: ऐंह्रींसौं:कामेश्वरमोरस्त्र

त्रशन्यात्मरत्नोकृर्यात् करषडंग

न्यासंवकुर्याद्यथा श्रीह्रींऐंमूलं

प्रथमकूटंमंत्रयुष्ठाभ्यांनमः श्री

ह्रींक्लींमूलंद्वितीयकूटंतर्जनीभ्यां

स्वाहा श्रीह्रींसौंमूलंतृतीयकूटंम

ध्यमाभ्यांवषट् श्रीह्रींऐंप्रथमकू

टंमनामिकाभ्यांहुं श्रीह्रीक्लीमू

लंद्वितीयकूटंकनिष्ठिकाभ्यांवौ

षट् श्रीह्रींसौं:मूलंतृतीयकूटं

करतलकरपृष्ठाभ्यांफट् इति

करन्यासः अथषडंगन्यासः श्री

ह्रीं ऐं मूलं प्रथमकूटं हृदयाय
नमः श्रीं ह्रीं क्लीं मूलं द्वितीयकू
टं शिरसे स्वाहा श्रीं ह्रीं सौः मूलं तृती
यकूटं शिखायै वषट् श्रीं ह्रीं ऐं
मूलं प्रथमकूटं कवचाय हुं श्रीं
ह्रीं क्लीं मूलं द्वितीयकूटं नेत्रत्रया
य वौषट् श्रीं ह्रीं सौः मूलं तृतीय
कूटं अस्त्राय फट् इति षडङ्गन्या
सः ऐं नमो मूलाधारे क्लीं नमो
भ्रूमध्ये इत्येवं न्यासं यथाशक्ति वि
धाय दिव्यदेहं ध्यात्वा हृदये ऐं
क्लीं सौः कामेश्वरपीठाय नमः

का. प. ९

10

हृदि गंधाक्षतैः संपूज्य स्वमूल
षडंगन्यासं कुर्यात् ऐं हृदयाय।
नमः क्लीं शिरसे स्वाहा सौः शि
खायै वौषट् ऐं कवचाय हुं क्लीं
नेत्रत्रयाय वषट् सौः अस्त्राय फ
ट् इत्यंगन्यासं विधाय बहिः प्रीच
क्रे विलिख्य संस्थाप्य वा पूजयेत्
यथा तच्चक्रं चतुरस्रं षोडशदल
मष्टदलपद्मं चेद्वृत्तं चतुर्दशार
द्वयमर्कवृत्तं अष्टदले त्रिकोण
बिंदुकं श्रमिश्ररूपं ध्यात्वा मूलमुद्रा
यै समस्तप्रकटगुप्तगुप्ततरसंप्र।

दायकुलकौलनिगर्भरहस्याति
रहस्यपरापरातिरहस्यश्रीचक्र
योगिनीपादुकाभ्योनमः इति।
श्रीचक्रे पुष्पांजलिंदत्वा तत्र यो
गपीठमभ्यर्च्चयेत् यथा ह्रींश्रीं
मण्डूकायनमः एवंसर्वत्र ह्रींश्रीं
कालाग्निरुद्रायनमः ह्रींश्रींमूल
प्रकृत्यैनमः ह्रींश्रींआधारशक्त्यै
नमः ह्रींश्रींकूर्मायनमः ह्रींश्रीं
अनंतायनमः ह्रींश्रींवराहाय
नमः ह्रींश्रींपृथिव्यैनमः रत्नद्वी
पपारिजातवनमध्ये ह्रींश्रींनव

का. प. ११

रत्नविराजितनवरत्नखंडमयद्वी
पायनमः तत्र ईशानादिषट्स
शट्त्रिकोणेन मध्ये ह्रीं श्रीं पुष्प
रागरत्नखंडायनमः ईशाने ह्रीं
श्रीं नीलरत्नखंडायनमः पूर्वे
ह्रीं श्रीं वैडूर्यरत्नखंडायनमः आ
ग्नेये ह्रीं श्रीं विद्रुमरत्नखंडायन
मः दक्षिणे ह्रीं श्रीं मौक्तिकरत्न
खंडायनमः नैरृत्ये ह्रीं श्रीं मरक
तरत्नखंडायनमः पश्चिमे ह्रीं श्रीं
वज्ररत्नखंडायनमः वायव्ये ह्रीं
श्रीं गोमेदरत्नखंडायनमः उत्तरे

एतन्मध्ये ह्रीं श्रीं पद्मरागावेदाय
नमः मध्ये ह्रीं श्रीं सुवर्णपर्वता
यनमः तदुपरि ह्रीं श्रीं नंदनोद्या
नायनमः तन्मध्ये ह्रीं श्रीं पद्मव
नायनमः ह्रीं श्रीं विविधरत्नख
चितभूमिकायैनमः तन्मध्ये
ह्रीं श्रीं सहस्रस्तम्भावितमध्यसं
भवविवर्जित चतुःपंचाशद्योजन
विस्तीर्णनानारत्नखचितचिंताम
णिमंडपायनमः तन्मध्ये ह्रीं श्रीं
नवरत्नखचितरत्नमयवेदिका
यैनमः तदुपरिमध्ये रत्नसिंहास

का॰
प॰
१२

नायनमः तदुपरि श्वेतच्छत्राय
नमः सिंहासनपार्श्वेपीठस्यक
ल्पिताग्नेकोणादिषु ह्रींश्रींधर्मा
यनमः ह्रींश्रींज्ञानायनमः ह्रीं
श्रींवैराग्यायनमः ह्रींश्रींऐ
श्वर्यायनमः सिंहासनमध्ये आ
नंदकंदायनमः संविन्नालायन
मः सहस्रदलकमलासनायन
मः प्रकृतिमयपत्रेभ्योनमः वि
कृतिमयकेसरेभ्योनमः पंचाश
द्वर्णबीजाढ्यसर्वतत्वरूपायैक
र्णिकायैनमः कर्णिकोपरि श्रे

अर्कमंडलायनमः संसोममंड
लायनमः रंवह्निमंडलायनमः
तंतमसेनमः रंरजसेनमः संसत्वा
यनमः ऐंह्रींसौंः मूलमुच्चार्य स
र्वमंत्रासनायनमः अंआंइंईंउंऊंऋं
ॠंलृंलॄंएंऐंओंऔंअंअः कंखंगंघंङं
चंछंजंझंञंटंठंडंढंणंतंथंदंधंनंपं
फंबंभंमंयंरंलंवंशंषंसंहंळंक्षंः इ
त्युच्चार्य शिवशक्तिसदाशिव
ईश्वरशुद्धविद्यामायाकलाविद्या
रागकालनियतिपुरुषप्रकृत्यहं
कारबुद्धिमनः श्रोत्रत्वक्चक्षुःजिह्वा

का॰
प॰
१३

13

घ्राणवाक्पाणिपादपायूपस्थश
ब्दस्पर्शरूपरसगंधाकाशवायु
वह्निसलिलपृथिव्यात्मने श्रीयो
गपीठासनाय नमः इति ध्या
नान्ते पुष्पांजलित्रयं दद्यात् अथ नी
करणमुद्रांबध्वा पद्ममुद्रांतर्गत
पुष्पंसन्निधाय मूलाधारात्कुंडलि
नीं तडित्कोटिप्रद्योतिनीं सूर्यको
टिप्रतीकाशां वह्निकोटिदुरास
दां चंद्रकोटिसुशीतलां प्रदीपक
लिकाकारां तत्त्वाद्यां सुषुम्णामार्गे
ण ब्रह्मपद्मान्तस्थकामेश्वरेण।

मेयोऽयं सोममंडलममृतधार
यामेतच्च पुनः स्वहृदि समानी
य स्वस्थाने प्रापयित्वा कामेश्व
रमयोस्त्वात्मा शिवोऽहमिति भाव
येत् देवं भावयेत् चंद्रकोटी
निभात्मा मानसोपचारैः संपूज्य
कलशस्थापनं कुर्यात् स्ववामे
त्रिकोणषट्कोणवृत्तरश्रं वि-
लिख्य धेनुमुद्रां प्रदर्श्य षडंग
मंत्रैः संपूज्य फट् इति प्रक्षाल्य
मूलेन संपूज्य रं वह्निमंडलाय द
शकलात्मने नमः इति संपूज्य

का. प. १५

14

अर्घ्यं संस्थाप्य तत्र पात्रमाधारे
निधाय अग्न्यर्कमंडलाय द्वादश
कलात्मने नमः इति पात्रं ततः सं
पूज्य तत्र जलेन संपूर्य सोमा
मंडलाय षोडशकलात्मने नमः
इति संपूज्य तत्रांकुशमुद्रया गंगे
गंगेत्यादितीर्थमावाह्य मूलेना
भिमंत्रितं कृत्वा धेनुयोनिक
लशमुद्राः प्रदर्श्य फट् इति छोटि
काभिः संरक्ष्य हूमित्यवगुंठ्य शं
खचक्रयोनिमुद्राः प्रदर्श्य प्रणमे
त् इति शंखप्रणामो दर्शनेनापि

धं त्वस्य किंचनः स्पर्शनेनैव वि
लयं यांति पापानि हिमवद्भास्क
रोदये इति सामान्यार्घ्यविधिः त
तः कलशस्थापने सामान्यार्घ्यस्य
दक्षे यागांगनगेत त्रिकोणषट्कोण
वृत्तचतुरस्रमंडले विधाय काम
रूपउड्डियानजालंधरपूर्णगिरि
पीठेभ्यो नमः इति चतुरस्रमंड
ले षडङ्गेषु प्रादक्षिण्येन मूलेन प्र
थमकूटं हृदयाय नमः मूलेन द्विती
यकूटं शिरसे स्वाहा मूलेन तृतीयकू
टं शिखायै वषट् मूलेन प्रथमकूटं

का॰ प॰ १५

15

कवचाय हुं मूलं द्वितीयकूटं ने
त्रत्रयाय वौषट् मूलं तृतीयकू
टं अस्त्राय फट् इति षट्कोणेष
ङ्गं संपूज्य त्रिकोणे बीजत्रयं सं
पूज्य विंदौ मूलं संपूज्य रं वह्निमं
डलाय दशकलात्मने नमः इति
प्रक्षालितमाधारं संस्थाप्य अं अ
र्कमंडलाय द्वादशकलात्मने नमः
इति कलशं हुं मस्तुद्वया संस्थाप्य
नव ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः श्रीकामे।
श्वरभैरवाय नमः इति मूलविद्य
यापात्रं परमानंदद्रव्यादिश्च पं हुं

भमार्घ्यं सौं सोममंडलायषो
डशकलात्मनेनमः इतिगंधाक्ष
तैरभ्यर्च्य हंसः इतिमंत्रेणदशादि
शोवद्ध्वा छोटिकाभिः संरक्ष्य फ्रा
मित्यवगुंठ्य नमस्त्यमुद्रय मूले
दशधाजप्त्वा अमृतमुद्रांप्रदर्श्य
ॐ अं आं इं ऐं क्लीं सौः अमृते अमृ
तोद्भवे अमृतवर्षिणि अमृतं स्रा
वय स्रावय ऐं क्लीं सौः अमृतेश्व
र्यै नमः इतिदशधाजप्त्वा ऐं क्लीं
सौः सूर्यमंडलसंभूते वरुणाल
यसंभवे अमाबीजमये देविशु।

का. कृशानाहितस्थानं वेदान्तं ज्ञानवो
प. वीजं ब्रह्मानंदमयं यदि तेन सत्येनेदे
१९ विशापब्रह्महत्यापापोहत एकमेव
16 परंब्रह्म स्थूलसूक्ष्ममयं ध्रुवं कवो
ऽवां ब्रह्महत्यां तेन तेन नाशयाम्यहं
ब्रह्मशापविनिर्मुक्तांव शुक्राविश्व
शापतः विमुक्ता रुद्रशापेन पवि
त्रा भव सांप्रतं पावमानः परानंदः
पावमानः परो रसः पावमानं परं त्वा
नेते नेते पावयाम्यहं इति त्रिर्जप्त्वा
ॐ हसक्षमलवरयूं आनंदभैरवा
य वौषट् इति दशधा जप्त्वा ॐ हस

रक्तमलवयऊं स्हां हैं क्ष्मैं वौं षट्
इति दशधा जप्त्वा गंगे चैवं कुंभशाङ्ग
ह्यात्तीर्थान्यावाह्य कुंडलिनीमो
तीह्रणासुम्नाय षट्चक्रं भित्वा ब्र
ह्मरंध्रस्थपरमशिवभट्टारकेण नि
योज्य हंसः सोहं स्वाहेति विधिवित्स त
योः सामरस्योद्भवानंदामृतेन वह्ला
मनामाशूरं निस्सरता मृतधारया क।
लशमापूर्य: अमृतमयं ध्यात्वा गंधा
क्षतपुष्पैरभ्यर्च्य धेनुयोनिमुस्तु
द्राः प्रदर्श्य प्रणमेदिति द्रव्यशुद्धिः
ऐंक्लींसौः हंसः परामृतेशाय्यीति

का॰
प॰
१८

17

पुरसुंदरीकामेश्वरपूजाङ्गत्वेभ्यो
वौषट् इतिकलशामृतमादाय मू
लेन श्रीत्रिपुरसुंदरीकामेश्वरंब्रह्मा
मृतमयेनकलशामृतेनयागगृहमा
त्मापवित्रंकुरु २ सुधादिनाहृदय २
ऐंह्रींस्वाहा इतियागवस्तूनिसंशो
ध्य सामान्यार्घ्ये त्रिकोणंविभाव्य
मूलबीजत्रयेणत्रिकोणंसंपूज्य मू
लविद्ययाबिन्दुमध्यार्घ्यंसंपूज्य ऐंपृ
थिव्यादिषट्त्रिंशत्तत्त्वानिसंपूज्य म
हामुद्रांप्रदर्श्य पद्मामृतमुद्राःप्रद
र्श्य मातृकांदेवींसंपूज्य मूलवर्णा

मृतं ततः संपूज्य गंगेत्यादितीर्था
न्यावाह्य शिवमंत्रं ध्यात्वा परमामृ
तत्र ध्यात्वा बिंदुपातनाविर्भूतं पञ्चमाल
शिवमंत्रं जगद्भावयेत् इति परमा
र्घ्यपात्रं संस्थाप्यार्घ्यस्य वामे गुरुश
क्तियोगिनीवीरवटुकक्षेत्रपालपा
त्राणि संस्थाप्य तत्रांतरे पाद्यादि
स्वाचमनीयमधुपर्कपात्राणि संस्था
प्य इति पात्रस्थापनं पाद्यादिपात्रे
षु पानीयं गुरुपात्रादिषु दिव्याष्टं त
तत आत्मानं मूलविद्यया संपूज्य स्वा
यां तं कुंडलिनीं संस्थाप्य परमशि

का० प० १८

18

वेन संयोज्य चंद्रमंडलस्य श्रीका
मेश्वरललाटावर्तस्य चंद्रकलामृ
तधारया स्वात्मानं संज्ञाव्य शिवो
हमिति स्मरन् चिदानंदमयो भूत्वा
विश्वस्वेतमिति ध्यात्वा सदेवीकं शि
वं हृत्कमले ध्यात्वा यथोक्तं स्मरन्
मानसैरुपचारैः संपूज्य स्वात्मानं त
न्मयं भावयित्वा श्रीचक्रं सर्वीकं श
त्वाल्य श्रीरत्नपीठं संस्थाप्य योगा।
पीठपूजां कुर्यात् मूलं श्रुं ग्रां रमादि
तोंतस्तत्वार्थे शिवशक्तिसदाशिव
ईश्वरशुद्धविद्यामायाकलाविद्या।

रागकलानियतिपुरुषप्रकृत्यहं
कारबुद्धिमनः श्रोत्रत्वक्चक्षुः जिह्वा
घ्राणवाक्पाणिपादपायूपस्थश
ब्दस्पर्शरूपरसगंधाकाशवायुव
ह्निसलिलपृथिव्यात्मने श्रीयोग
पीठाय नमः इति श्रीचक्रं संपूज्य
ऐं ह्रीं सौः ॐ नमो भगवते सकल
गुणात्मशक्तियुक्तायपरानंताय
योगपीठात्मने नमः इति योगपी
ठं संपूज्य अमृतीकरणमुद्रां ब
द्ध्वा मूलमंत्रेण सकल्यावाहयेत्
मूलेन सषुमणाध्वनामलसंपूज्यो

का॰ प॰ १९ 19

तिः वामनासया निःसार्य करस्थ
पुष्पे पुस्थितं ध्यात्वा देवमावाह
येत् स्वात्मसंस्थमजं शुद्धं त्वाम
हं परमेश्वर अरण्यामिव हव्याशं
विंदावावाहयाम्यहं देवेशमक्
लसपरिवारसमन्वित यावत्त्वां
पूजयिष्यामि तावच्छिव इहावह
इति मूलमुच्चार्य पत्रे पुष्पाञ्ज
लिं दत्वा आवाहसंस्थाप्य सन्नि
रुध्य मूलेन दशमुद्राः प्रदर्श्य ऐं
क्लीं सौः ओं ह्रीं श्रीं यं रं लं वं शं षं सं
हं ऐं क्लीं सौः हंसः श्रीमहात्रिपुर

सुंदरीसहितकामेश्वरस्यप्रा
णाः इह प्राणाः ।१। जीव इह स्थि
तः ।२। सर्वेंद्रियाणि इह स्थिता
नि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वा
घ्राणप्राणा इहागत्य सुखं चिरं
तिष्ठंतु स्वाहा इति देवस्य प्राणा
न्यस्त्वा पंचमुद्राः प्रदर्श्य धेनुमुद्र
याऽमृतीकृत्य महामुद्रया परमी
कृत्य षडंगैः सकलीकृत्य शंख
चक्रत्रिखंडापाशकलशमालामु
द्राः प्रदर्श्य भगवन् श्रीत्रिपुरसुंद
री सहितकामेश्वर इहासंनेरस्यतां

का
प.
९

फट् भगवन्स्वागतमिदमर्घ्यायेन
मस्कृतमुद्याग्रणम् मूलेभग
वन्सदेवीकआचमनीयंनमः मू
लेभगवन्सदेवीकइदमर्घ्यंस्वाहा
मूलेभगवन्सदेवीकपद्यंतेगंयो
नमः मूलेभगवन्सदेवीकअत्त
नईदमेतानिपुष्पाणिवौषट् प्रणा
माकईर्वाकमथशिवाङ्केनाभि
मिश्रितेगंगोदकेसमादायमूल
मंत्रेणमंत्रयेत् मूलेभगवन्सदे
वीकसर्वांगेगंगोदकेस्नानीयंनमः
मूलेभगवन्सदेवीकमहास्नानतम

ह्रां ह्रीं वस्त्रद्वयं नमः मूलं भगवन्स्वदे
वीकञ्चुकाभरणानि निवेदयामि न
मः मूलं भगवन्स्वदेवीकरत्नसिंहा
सने उपविश्य मूलं भगवन्स्वदेवीक
धूपं गृह्हाण नमः मूलं भगवन्स्वदे।
वीकनैवेद्यं गृह्हाण नमः इति धूपदी
पौ दत्वा पात्रीकरणमुद्रां प्रदर्श्य त्रि।
कोणवृत्तमंडले विभाव्य स्थापयेत्पात्रं
संस्थाप्य दिव्यौदनं परसोपेतं नानाव्य
जनान्वितं धेनुमुद्रया धेनूकृत्य ॐ
अमृतोपस्तरणमसि स्वाहा इति नैवे
द्य मूले दत्वा यजमानः प्राणादिपंचग्रा

का. सप्तद्वाः प्रदद्यु प्रसृतापि यान्मसि
प. स्वाहा इति भगवते शिवाय जलं दा
२१ त्वा मूलेन तां बलिं निवेद्य दिव्यया
शामृतेन दशधा संतर्प्य प्रणम्य परि
वारदेवताः देवीगात्रैः स्तुत्वा ध्यात्वा
यथोविधिन्यस्यात्मे स्वे संस्थाप्य ध्यात्वा
प्रणवपूर्वकं प्राणायामत्रयं विधा
य श्रीचक्रपरिवारदेवताः पूजयेत्
तत्र गुरुपंक्तित्रयं विभाव्य पूजयेत्
दिव्यौघेभ्यो गुरुभ्यः सिद्धौघेभ्यो गु
रुभ्यः मानवौघेभ्यो गुरुभ्यः ततः स
र्वत्र तत्र दशलोकपालान्पूजयेद्यथा

लं इंद्रायवज्रहस्तायनमः रं अग्नये
शक्तिहस्तायनमः टं यमायदंडह
स्तायनमः नं नैर्ऋतयेखड्गहस्ता
यनमः हं ईशानायत्रिशूलहस्ताय
नमः कं कुबेरायगदहस्तायनमः
वं वरुणायपाशहस्तायनमः वा
यवेध्वजहस्तायनमः ह्रीं अनंता
यहलहस्तायनमः ब्रीं ब्रह्मणेप
द्महस्तायनमः ततोमूलेनदेवंसं
पूज्यसंतर्प्य एभिर्तियोनिमुद्रयाप्र
णमेत् इतिप्रथमावरणे षोडशदे
वताःपश्चिमादिपूर्वदक्षिणावर्तेन।

का॰
प॰
१२

एतयेयथा ऐं ह्रीं सौंः सर्वाशाप
रिपूरकचक्राय नमः इति पुष्पाञ्ज
लिं दत्वा ऐं ह्रीं सौंः अं कामाकर्षिणी
पादुकां पूजयामि तर्पयामि नमः
ऐं ह्रीं सौंः आं बुद्ध्याकर्षिणी पादुकां
पूजयामि तर्पयामि नमः ऐं ह्रीं सौंः
इं अहंकाराकर्षिणी श्रीपादुकां पूज
यामि तर्पयामि नमः ऐं ह्रीं सौंः ईं
शब्दाकर्षिणी श्रीपादुकां पूजयामि
तर्पयामि नमः ऐं ह्रीं सौंः उं स्पर्शाक
र्षिणी श्रीपादुकां पूजयामि तर्पया
मि नमः ऐं ह्रीं सौंः ऊं रूपाकर्षिणी श्री

पादुकां पूजयामि तर्पयामि नमः
ऐं ह्रीं सौः ऋं रसाकर्षिणि श्रीपादुकां
पूजयामि तर्पयामि नमः ऐं ह्रीं सौः
ॠं गंधाकर्षिणि श्रीपादुकां पूजयामि
तर्पयामि नमः ऐं ह्रीं सौः ऌं चित्ताक
र्षिणि श्रीपादुकां पूजयामि तर्पयामि
नमः ऐं ह्रीं सौः ॡं धैर्याकर्षिणि श्री
पादुकां पूजयामि तर्पयामि नमः
ऐं ह्रीं सौः एं स्मृत्याकर्षिणि श्रीपादुकां
पूजयामि तर्पयामि नमः ऐं ह्रीं सौः
ऐं नामाकर्षिणि श्रीपादुकां पूजयामि
तर्पयामि नमः ऐं ह्रीं सौः ओं बीजाक

का. प. ११ षिणीश्रीपादुकांपूजयामितर्पया
मिनमः ऐंह्रींसौंः ॐआत्माकर्षि
23 णीश्रीपादुकांपूजयामितर्पयामि
नमः ऐंह्रींसौंः अंअमृताकर्षिणीश्री
पादुकांपूजयामितर्पयामिनमः
ऐंह्रींसौंः अंः शरीराकर्षिणीश्रीपादु
कांपूजयामितर्पयामिनमः इति
संपूज्यसंतर्प्य मूलेनमूलदेवंसंत
र्प्य पंचमितियोनिमुद्रयाप्रणमेत्
इतिद्वितीयावरणं १ अष्टाष्टदले
ऐंह्रींसौंः सर्वसंक्षोभककारकच
क्रायनमः इतिपुष्पांजलिंदत्वा

ऐंह्रींसौंः कंखंगंघंङं असितांगभैर
वश्रीपादुकांपूजयामितर्पयामिन
